श्री निंबाद्री लक्ष्मीनृसिंह प्रपत्तिः

लक्ष्मी पक्षिरथस्य वक्षसि गतामब्जे क्षणीमब्जां ।
क्षुद्रक्षुब्धदरिद्रभक्तजनतारक्षादुरीणक्षमां ।
क्षीरोदप्रिय पुत्रिकांत्रिजगतः क्षेमंकरी भास्वरीं ।
वंदे निंबगिरीशमेश नृहरेर्वामांकगां मातरं ॥1॥

जननी जगतामशेषशक्तेर्जगदीशस्य जनार्दनस्य पत्नीं ।
कमलाममलाब्जपत्रनेत्रां कलये मनसा हिरण्यवर्णां ॥2॥

लक्ष्मीपते नरहरे नतभक्तपाल
नारायणाश्रित सुखप्रद दैत्यहारिन् ।
निंबाद्रिकंदरनिवास सुरेशवंद्य
लक्ष्मीनृसिंहचरणौ शरणं प्रपद्ये ॥3॥

भक्तस्समर्पित पवित्रसहस्रनाम
पूजाविधीय तुलसीदलशोभमानौ ।
प्राप्यां भवाब्धितरणे तरणिस्स्वरूपां
निंबाद्रिनाथचरणौ शरणं प्रपद्ये ॥4॥

कालीयमस्तकमणींद्र विशेषशोभा
नीराजितो सुरनदीजननालवालों ।
भूम्यंतरिक्ष परिमापक मानदंडों
निंबाद्रिनाथचरणौ शरणं प्रपद्ये ॥5॥

राजीवचक्ररथशंखघटातपत्र
संतानहस्तिमणिवज्रविशेषचिन्हेः ।
युक्तौ सुरासुरकिरीटमणिद्युभासां
निंबाद्रिनाथचरणौ शरणं प्रपद्ये ॥6॥

पद्माक्षमादिमहिषिभिरदभ्रभीत्या
संवाह्यमानमृदुलौ मधुरायमानां ।
तापत्रयातुरजनस्य शरण्यभूतौ
निंबाद्रिनाथचरणौ शरणं प्रपद्ये ॥7॥

पंकेरुहद्वयसमागमसुंदरौ तौ
भक्ताक्षिभृंगपरिवेष्टितनीलशोभां ।
राकाकलाधरदशेव नखप्रकाशां
निंबाद्रिनाथ चरणौ शरणं प्रपद्ये ॥8॥

सद्भक्तमानससरोवरराजहंसा
सांगाखिलश्रुतिशिरोमकटायमानां ।
ब्रह्मादिकीरजगदेकशरण्यभूतौ
निंबाद्रिनाथ चरणौ शरणं प्रपद्ये ॥9॥

प्रह्लादगौतमसती मुचकुंद पार्थ
भीष्मादिभक्तजनसंवितभव्यरूपौ ।
सर्वाद्यशांतिकरसर्वशरण्यभूते
निंबाद्रिनाथ चरणौ शरणं प्रपद्ये ॥10॥

गोविंदलान्वयसुधाकरनारसिंह
श्रीश्रीनिवासगुरुपुंगवयुग्मकेन ।
प्राप्यौ तवेति ममदर्शितपैतृकस्वौ
निंबाद्रिनाथ चरणौ शरणं प्रपद्ये ॥11॥

इति श्रीनिंबाद्रीलक्ष्मीनृसिंहप्रपत्तिः संपूर्णा ।